सामाजिकान्तर्जालीय- सन्देशे श्रीमोदी कतिपयवर्षेभ्यः पूर्वं अस्मिन् उत्सवे स्वस्य यात्रायां मधुरस्मृतयः स्मरणं कृतवान्, अपि च नागा-संस्कृतेः जीवन्तताम् अनुभवितुं नागरिकैः आग्रहं कृतवान् ।

----------------------------------------

पुतिनः-भारतम्

रूसस्य राष्ट्रपतिना व्लादिमीर-पुतिनेन भारते लघु-मध्यमोद्यमानां स्थितिं सुदृढं कर्तुं प्रधानमन्त्रिणः नरेन्द्र-मोदिनः नेतृत्वभूतस्य सर्वकारस्य प्रशंसा कृता अस्ति । ह्यः मॉस्को-नगरे एकं निवेश-मंचं संबोधयन् श्री-पुतिनः रूसस्य आयात-प्रतिस्थापन-कार्यक्रमेण सह अस्य समानतां प्रतिपादयन् प्रावोचत् यत् भारतेन सविशेषं मेक इन इंडिया इत्यस्मै महत्वं प्रदत्तम् । राष्ट्रपतिना पुतिनेन प्रोक्तं यत् भारतस्य नेतृत्वेन नीतिगतरूपेण स्वहितानां प्राथमिकतायां ध्यानं केन्द्रितं कृतम् सहैव तेन भारते विनिर्माण-संचालनं स्थापितं कर्तुं रूसस्य तत्परता अपि व्यक्तीकृता । श्रीपुतिनेन लघु-मध्यमोद्यमानां विकासाय ब्रिक्स्-देशानां मध्ये पारस्परिक-सहयोगं सम्वर्धनार्थम् अपि आह्वानं कृतम् । तेन आगामि वर्षे ब्राजीले आयोक्ष्यमाणस्य शिखरसम्मेलनस्य अवधौ परस्परसहयोगस्य विवर्धनाय प्रमुखक्षेत्राणाम् आकलनं विधातुं सदस्यदेशाः सम्प्रार्थिताः ।

----------------------------------------

दिल्ली-वायु-गुणवत्ता-सूचकाङ्कः

दिल्ल्यां वायु-गुणवत्तायां परिष्करणं निरन्तरं प्रचलति। अद्य अपराह्णे एकवादनं यावत् (AQI) इति वायु-गुणवत्ता-सूचकांकः एकषष्ट्यधिकैकशतम् आसीत्, यः सूचकाङ्कस्य मध्यमश्रेण्याम् अस्ति । केन्द्रीय-प्रदूषण-नियन्त्रण-विभागस्य अनुसारं, नगरस्य केषुचित् क्षेत्रेषु वायु-गुणवत्ता-सूचकांकस्य स्तरः द्विशतं अत्यक्रामत् । दिल्ल्याः शादीपुर-स्थानके वायु-गुणवत्ता-सूचकांकः चतुर्पञ्चाशदधिक-द्विशतं , मुंडकायां चतुर्विंशत्यधिक-द्विशतं , नेहरू-नगरे सप्तत्रिंशदधिक-द्विशतं,

